स्मरणात् । अथाविज्ञातदेशतया मूलमाहर्त्तुं न शक्नोति तदा क्रयं शोधयित्वैव शुद्धो भवति । “असमाहार्यमूलस्तु क्रयमेव विशोधयेदिति” मनुवचनात् । यदा पुनः साक्ष्यादिभिर्दिव्येन वा क्रयं न शोधयति मूलञ्च न प्रदर्शयति तदा स एव दण्डभाग्भवतीति । “अनुपस्थापयन्मूलं क्रयं वाप्यविशोधयन् । यथाभियोगन्धनिने धनन्दाप्योदमञ्च स” इति स्मरणात् । स्वं लभेतान्यविक्रीतमित्युक्तम् तस्मिन्नुना किं कर्त्तव्यमित्यत आह । “आगमेनोपभोगेन नष्टम्भाव्यमतोऽन्यथा । पञ्चबन्धोदमस्तस्य राज्ञे तेना विभाविते” आगमेन रिक्थक्रयादिना उपभोगेन च मदीयमिदन्द्रव्यं तच्चैवं नष्टमपहृतं वेत्यपि भाव्यं साधनीयन्तत्स्वामिना । अतोऽन्यथा तेन स्वामिना अविभाविते पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशोदमोनाष्टिकेन राज्ञे देयः । अतैवायं क्रमः । पूर्व्वं स्वामी नष्टमात्मीयं साधयेत्ततः क्रेता चौर्य्यपरिहारार्थं मूल्यलाभाय च विक्रेतारमानयेत् । अथानेतुन्न शक्नोति तदात्मदोषपरिहाराय क्रयं शोधयित्वा द्रव्यं नाष्टिकस्य समर्पयेदिति । तस्करस्य प्रच्छादकमप्याह । “हृतं प्रनष्टं योद्रव्यम्परहस्तादवाप्नुयात् । अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिम्पणान्” या० । हृतम्म नष्टं वा चौरादिहस्तस्थं द्रव्यम् अनेनमदीयन्द्रव्यमपहृतमिति न्यपस्थानिवेद्यैव दर्पादिना योगृह्णात्यसौ षडुत्तराद्नवतिम्पणान्दण्डनीयस्तस्करप्रच्छादकत्वेन दुष्टत्वात् । राजपुरुषानीतं प्रत्याह । “शौल्किकैः स्थानपालैर्व्वा नष्टापहृतमाहृतम् । अर्वाक् संवत्सरात्स्वामी हरेत परतोन्नृपः” या० । यदा तु शुल्काधिकारिभिः स्थानरक्षिभिर्वा नष्टमपहृतन्द्रव्यं राजपार्श्वं प्रत्यानीतन्तदा संवत्सरादर्वाक् प्राप्तश्चेन्नाष्टिकस्तद्द्रव्यमवाप्नुयात् । ऊर्द्ध्वं पुनः संवत्सराद्राजा गृह्णीयात् । स्वपुरुषानीतञ्च द्रव्यं जनसमूहेष्वुद्घोष्य यावद्वत्सरं राज्ञा रक्षणीयम् । यथाह गोतमः । “प्रनष्टमस्वामिकमधिगम्य राज्ञे प्रब्रुयुर्विख्याप्य संवत्सरं राज्ञा रक्ष्यमिति” यत्पुनर्मनुनावध्यन्तरमुक्तम् । प्रनष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत् । अर्व्वाक् त्र्यब्दाद्ध चेत्स्वामी परतोन्नृपतिर्हरेत्” इति । तच्छ्रुतवृत्तसम्पन्नब्राह्मणविषयम् । रक्षणनिमित्तं षड्भागादिग्रहणञ्च तेनैवोक्तम् । “आददीताथ षड्भाग प्रनष्टाधिगतान्नृपः । दशमं द्वादशं वापि सतान्धर्म्ममनुस्मरन्निति” । तृतीयद्वितीयप्रथमवत्सरेषु यथाक्रमं षष्ठादयो भागावेदितव्याः । प्रपञ्चितञ्च तत्पुरस्तात् । सनक्षषड्भागादिग्रहणस्य द्रव्यविशेषे अपवादमाह । “पणानेकशफे दद्याच्चतुरःपञ्च मानुषे । महिषोष्ट्रगवां द्वौ द्वौ, पादम्पादमजाविके” या० । एकशफे अश्वादौ प्रनष्टाधिगते तत्स्वामी राज्ञे रक्षणनिमित्तञ्चतुरःपणान् दद्यात् । मानुषे मनुष्यजातीये द्रव्ये पञ्च पणान् महिषोष्ट्रगवां रक्षणनिमित्तम्प्रत्येकं द्वौ द्वौपणौ, अजाविके पुनः प्रत्येकम्पादम्पादं दद्यादिति सर्व्वत्रानुषज्यते । अजाविकमिति समासनिर्द्देशेऽपि पादम्पादमिति वीप्सावलात्प्रत्येकं सम्बन्धोगम्यते” मिता० ॥ प्रायश्चित्त तत्त्वे तु चौरालाभविषये विशेषोदर्शितो यथा “प्रकाशक्रये तु स्वामिनोग्रहणे नारदवृहस्पती । वणिग्वीथीपरिगतं विज्ञातं राजपुरुषैः । अविज्ञाताश्रयात् क्रीतं विक्रेता यदि वा मृतः । स्वामी दत्त्वार्द्धमूल्यन्तु प्रगृह्णीत स्वकन्धनम् । अर्द्धं द्वयोरपहृतं तत्र स्यात् व्यवहारतः । अविज्ञातक्रये दोषस्तथा चापरिपालने । एतत्द्वयं समाख्यातं द्रव्यहानिकरं परम्” इति ।

**अस्वाम्य** न० अभावे न०त० । १स्वाम्याभावे स्वत्वाभावे न०ब० । २ स्वत्वशून्ये त्रि० । अस्वाम्यं हि भवेत्तत्र” स्मृतिः

**अस्वावेश** त्रि० स्वस्मिन् स्वस्थाने स्वभावे वा आविशति आ+विश–अच् ७त० । स्वस्थाने स्वभावे वा अस्थिते “जरदष्टस्वावेशम्” ऋ० ७, ३८, ७ ।

**अस्वास्थ्य** न० अभावे न०त० । १स्वास्थ्याभावे “य इत्थमस्वास्थ्यमहर्दिवं दिवः” माघः । २रोगादिद्यभिभवे च न०ब० । ३तद्वति त्रि० ।

**अस्वीकार** पु० अभावे न०त० । १स्वीकाराभावे न०ब० । २तच्छून्ये त्रि० । स्वीकारोऽङ्गीकारः प्रतिग्रहश्च ।

**अस्वीकृत** त्रि० न स्वीकृतः १गृहीतभिन्ने २अङ्गीकृतभिन्ने च ।

**अस्वैरिन्** पु० स्वैरी स्वाधीनः न०त० । १परतन्त्रे । स्त्रियां ङीप्

**अह** गतौ आत्म०भ्वा०सक० इदित् सेट् । अंहते आंहिष्ट । आनंहे “आनंहिरेऽद्रिं प्रति चित्रकूटम्” “आंहिषातां रघुव्याघ्रौ शरभङ्गाश्रमं ततः” भट्टिः । रि अंह्रिः पादः असुन् अंहः पापम् । इन् बा० नलुक् । अहिः सर्पः वेदादश्च । “एवा त इन्द्रोचथमहेम” ऋ० २, १९, ७, वेदे तु बा० नलुक् । लटः पञ्चानां लिटः पञ्चकादेशे ब्रुवश्चाहादेशः आह आहतुः आहुः आत्थ आहथुः “इत्याह भगवान् मनुः” इत्यादौ तु चादिगणपठितं विभक्तिप्रतिरूपमाहेति । [आञ्जिहत् त ।

**अह** दीप्तौ चुरा० इदित् उभ०अक० सेट् । अंहयति ते

**अह** व्याप्तौ स्वा०प०सक०सेट् । अह्नोति । आहीत् आह ।